तदित् पदं न विचिकेत–विद्वान् । यन्मृतः पुनरप्येति जीवान् ।

त्रिवृद्यद् भुवनस्य रथवृत् । जीवो गर्भो न मृतस्स जीवात् ॥ 6

ओं शान्तिः शान्तिः शान्तिः ॥

## 16 आयुष्य सूक्तं

**(Exact source not Known)**

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैः शिरः कृत्तिवासाः पिनाकी ।

ईशानो देवस्सन आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥ 1

विभ्राजमान–स्सरिरस्य मद्ध्याद् रोचमानो घर्मरुचिर्य आगात् ।

स मृत्युपाशा–नपनुद्य घोरा–निहायुषेणो घृतमत्तु देवः ॥ 2

ब्रह्मज्योतिर् ब्रह्मपत्नीषु गर्भं यमादधात् पुरुरूपं जयन्तं ।

सुवर्णरंभ–ग्रह–मर्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥ 3

श्रियं लक्ष्मी–मौबला–मंबिकां गां षष्टीञ्च यामिन्द्र–सेनेत्युदाहुः ।

तां विद्यां ब्रह्मयोनिं सरूपा–मिहायुषे तर्पयामो घृतेन ॥ 4

दाक्षायण्य-स्सर्वयोन्य स्सुयोन्य-स्सहस्रशो विश्व रूपा विरूपाः ।
ससूनव-स्सपतयः सयूथ्या आयुषेणो घृतमिदं जुषन्तां ॥ 5

दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान् ।
तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजाँ रीरिषो मोत वीरान् ॥ 6

एकः पुरस्तात् य इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनँ सांपराये स नो हविर् घृत-मिहायुषेऽत्तु देवः ॥ 7

वसून् रुद्राना-दित्यान् मरुतोऽथ साध्यान् ऋभून् यक्षान्
गन्धर्वाँश्च पितृँश्च विश्वान् । भृगून्थ्-सर्पाँश्चा-ङ्गिगरसोऽथ
सर्वान् घृतँ हुत्वा स्वायुष्या महयाम शश्वत् ॥ 8

विष्णो त्वन्नो अन्तम-श्शर्मयच्छ सहन्त्य ।
प्रते धारा मधुश्चुत उथ्संदुह्रते अक्षितं ॥ 9

(ओं शान्तिः शान्तिः शान्तिः ॥)